# 2025

## M.A. 3rd Semester Examination

## SANSKRIT

### Paper : 302 A/C

Full Marks : 50 Time : Two Hours

*The figures in the margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

### Paper : 302A

### [Drama - I]

सर्वे प्रश्नाः संस्कृतेनैव समाधेयाः।

### विभाग - क

1. एकः प्रश्नः समाधेयः — 10×1=10

(क) भवभूतिविरचितस्य 'उत्तररामचरितम्' — इति नाटकस्य प्रथमाङ्कस्य आलोचनात्मकं समीक्षणं प्रस्तूयताम्।

(ख) उत्तररामचरितस्य नाट्यवैशिष्ट्यं प्रतिपाद्यताम्।

2. कयोश्चिद् द्वयोर्व्याख्या कार्या — 5×2=10

(क) उत्पत्तिपरिपूतायाः किमस्याः पावनान्तरैः।
तीर्थोदकं च वह्निश्च नान्यतः शुद्धिमर्हतः॥

(ख) वितरति गुरुः प्राज्ञे विद्यां यथैव जडे
न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा।
भवति हि पुनर्भूयान्भेदः फलं प्रति तद्यथा
प्रभवति शुचिर्बिम्बग्राहे मणिर्न मृदादयः ॥

(ग) ईदृशानां विपाकोऽपि जायते परमाद्भुतः।
यत्रोपकरणीभावमायात्येवंविधो जनः ॥

## विभाग - ख

3. **एकः** प्रश्नः समाधेयः — 10×1=10

(क) का नाम नाटिका? नाटिकारूपेण रत्नावल्याः सार्थकता प्रतिपाद्यताम्।

(ख) रत्नावलीमाश्रित्य मदनमहोत्सवस्य वर्णना कार्या।

4. कयोश्चिद् *द्वयोर्*व्याख्या कार्या — 5×2=10

(क) इह प्रथमं मधुमासो जनस्य हृदयानि करोति मृदुलानि।
पश्चाद्विध्यति कामो लब्धप्रसरैः कुसुमबाणैः ॥

(ख) द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात्।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः ॥

(ग) उदयतटान्तरितमियं प्राची सूचयति दिङ्निशानाथम्।
परिपाण्डुना मुखेन प्रियमिव हृदयस्थितं रमणी ॥

**(Internal Assessment - 10 marks)**

## Paper : 302C

## [Ṇyāya - Vais'eṣika Dars'an]

### विभाग - क

1. एकः प्रश्नः समाधेयः — 10×1=10

(क) प्रमाणस्य प्रामाण्यकल्पे भाष्यकारेण किंविधं प्रमाणं स्वीकृतम्? तत्र प्रसङ्गे संशयवादिनां बौद्धानां मतानि खण्डयित्वा भाष्यकारमतं प्रतिस्थाप्यताम्।

(ख) न्यायमते प्रमाणं कतिविधम्? तत्र प्रत्यक्षप्रमाणस्वरूपं प्रतिपदव्यावृत्तिपुरःसरं निरूप्यताम्।

2. द्वयोर्व्याख्या कार्या — 5×2=10

(क) तत्र वादजल्पौ सप्रयोजनौ, वितण्डा तु परीक्ष्यते।

(ख) प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्।

(ग) प्रवर्तनालक्षणा दोषाः।

### विभाग - ख

3. एकः प्रश्नः समाधेयः — 10×1=10

(क) अनुमितौ किं करणम्? कश्च व्यापारः? तत्र व्यापारपदवाच्यस्य लक्षणं निरूप्य "इत्थञ्च यत्र ज्ञानद्वयं तत्रापि विशिष्टज्ञानं कल्पनीयं फलमुखगौरवस्यादोषत्वात्" इति सन्दर्भः व्याख्यायताम्।

P.T.O.

(ख) व्याप्तेः सिद्धान्तलक्षणं किम्? व्याप्तेः तल्लक्षणं निरूप्य सदसद्धेतुस्थलयोः लक्षणसमन्वयः प्रदर्श्यताम्।

4. द्वयोर्व्याख्या कार्या — 5×2=10

(क) अनुमायां ज्ञायमानं लिङ्गन्तु करणं नहि।

(ख) येन सम्बन्धेन हेतुता तेनैव सम्बन्धेन साध्यवदन्यावृत्तित्वं बोध्यम्।

(ग) सिषाधयिषया शून्या सिद्धिर्यत्र न विद्यते।
स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत्॥

**(Internal Assessment - 10 marks)**